॥श्रीः॥

भाट्ट भाषा

मां ॥श्रीगणेशाय नमः॥ श्रीत्रिपुरसुंदर्यै नमः॥ प्रणम्य धर्ममीशानं मीमांसां न विविक्षतां॥ बालानामुपकाराय भाट्टभाषाप्रकाश्य
ते॥१॥ धर्मेप्रमाणान्यथ कर्मभेदः शेषप्रयुक्तिक्रमकर्तृभेदाः॥ ऊह्यातिदेशास्तमनंतरं बाधो तंत्रप्रसंगाविति लक्षणार्थाः॥२॥
तत्र धर्मस्वरूपमुक्तो॥ फलतोपि च यत्कर्म नानर्थेनानुबध्यते॥ केवलं प्रीतिहेतुत्वात्तद्धर्म इति कथ्यत इति॥ श्येनादिव्या
वृत्त्यर्थं फलत इति॥ तस्य हि न धर्मत्वं श्येनेनाभिचरन् यजेतेति वेदबोधितत्वेपि तत्फलस्य शत्रुवधस्यानर्थहेतुत्वात्॥
पशुबीजादिवधजन्यदोषलेशधर्मेपि स्वल्पः संकरः स्यादिति सांख्याः मन्यंते तन्निरासाय केवलमिति॥ न हिंस्यात्सर्वा भूता
हिंसाया नीति निषेधो हिंसागतः सामान्याऽनर्थहेतुत्वं बोधयति॥ न तु अग्नीषोमीयं पशुमालभेतेति विहितायाः विधिस्पृष्टे निषेधा
नवकाशात्॥ परिहृत्यापवादमुत्सर्गः प्रवर्तत इति न्यायेन निषेधशास्त्रं क्रतुवंगहिंसापरिहृत्यैव प्रवर्तत इति न धर्मफले
संकरो१ दुःखलेशो स्तीति सूक्तं केवलमिति॥ धर्मे प्रमाणान्यपि लिङ्दानि॥ वेदोखिलो धर्ममूलं॥ तद्विदां च स्मृतिशीले॥ पुराणन्या

Acc. No. ~~3140~~ M.1661

Title - भाट्टभाषाप्रकाश (= भाट्टभाषाप्रकाशिका ?)
अंति लेखन स्थगित.

Author - नारायणतीर्थ (?)

Date - ?

Sub - मीमांसा (पूर्व)

folio - 16

Xerox - 30

पूर्वमीमांसा धर्मशास्त्राङ्गमिश्रिताः॥ वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेति॥ तथाहि स्वाध्यायोऽध्येतव्य इति तव्यप्रत्ययेन वि
धिभावनाऽभिधीयते॥ भावना च भवितुर्भवनानुकूलो भावकव्यापारः॥ स च सर्वेषां लकाराणामर्थः॥ विधिभावना तु प्रवर्तनात्मि
का लिङ्लोट्तव्यप्रत्ययपञ्चमलकारैश्चावगम्यते॥ सा च द्व्यंशा शाब्दी आर्थी च॥ मत्ये फलकरणेतिकर्तव्यतांशैस्त्र्यंशा॥ क
तत्र शाब्द्यामध्ययनेनेष्टवृत्तिः फलं॥ करणं तव्यप्रत्ययः॥ वेदस्य श्रवणाभावे पितृलोके यामा गन्तव्य इत्यादेरर्थवमामनेन राहुनस्ववतेय
तीति प्रत्ययान्तस्य च करणत्वं दृष्टं॥ इतिकर्तव्यता तु॥ अपपुनर्भवं ज्ञापयतीत्यर्थवादमुखेन प्राशस्त्यावगतिः॥ आ
र्थी तु किं भावयेदिति साकाङ्क्षायां कर्मोत्पन्नतया श्रुत्या स्वाध्यायस्यैव भाव्यत्वं गम्यते॥ ननु यथा विश्वजिता यजेतेत्यत्र स्व
फलस्य स्वत्वसम्भवात्स्वर्गकामस्तदिति पदमध्याह्रियते॥ यथा वा ज्योतिर्गौरायुरित्यादिवाक्यविहितरात्रिसत्रके प्रयागप्र
फलाश्रवणेऽपि प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्तीत्यर्थवादादवगम्यमतिष्ठाभिप्रतितेएता रात्रीरुपयुरिति प्रतिष्ठा

भाट्टभाषा

घृपि

एवं तत्प्रकरणपठितमंत्राणामपि तत्तत्कर्तृणि कार्थप्रकाशनसामर्थ्यरूपाल्लिंगात्तत्तदनुष्ठेयार्थस्मारकत्वेन दृष्टेनैव द्वारेण विध्येकवाक्यत्वो-
त्तौ अत्रापि पूर्ववत्परस्पराकांक्षा यस्त्वकेनचैरेव मंत्रार्थः स्मर्तव्यो न ग्रहणकवास्यादिनेति नियमो न तु दृशे किंचिद्दृष्टमप्रयोजनं लभ्यत इत्य-
दृष्टमगत्या कल्प्यते । यथा याचतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति विध्युद्देशः प्रतिग्रहीतुरिष्टिः प्रतीयते अ-
थापि प्रजापतिर्वरुणायाश्वमनयत्स स्वां देवतामार्छत् ॥ स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यदित्युपक्रमगतार्थवादस्सामर्थ्या-
द्दातुरिष्टिं प्रापयन् प्रतिगृह्णीयादित्यत्र प्रतिग्राहयेदिति णिच् श्रुतिमुत्थापयति होतुश्चैतत्त्वैं हविरध्यमारीतेति मंत्रः सामर्थ्याद्दष्कृ-
तुः प्रथममप्सु इति विधिमुत्थापयति एवमष्टकाः कर्तव्या इत्यादीनि मन्वादीनां स्मरणान्यपि स्वमूलभूतां श्रुतिमनुमापयं-
ति वेदैकप्रमाणकेषु दृष्टसर्वस्वेषु तेषु भ्रमविप्रलंभकत्वादिपुरुषदोषासंभवात् दृश्यंते च कश्चिद्घारवांतरैपि स्मृतिमूलभूताः
श्रुतयस्तत्सामान्यात्सर्वमपि स्मरणं दृष्टमूलकमेव यथोक्तं आत्मीयात्परकीयस्य दौर्बल्यं न हि किंचन प्रत्यक्षत्वाविशेषेण स्व-
प्रत्यक्षसमं हीति दितिन्यायेन प्रत्ययिततराणां मन्वादीनां प्रत्यक्षं लिंगादि प्रत्यक्षतुल्यमतस्तत्प्रणीता स्मृतिरपि मूलमनु-
मापयेदेव अनेकासु शाखासु विप्रकीर्णानामर्थानां सुखप्रतिपत्तये एकत्रमेलयनेनमर्थवत्त्वं भवतीति सिद्धं स्मृतीनां वेदमू-

लकेत्वेन प्रामाण्यं औदुंबरी सर्वा वेष्टयितव्येति स्मृतिः औदुंबरीं स्पृष्ट्वोद्गायेदित्यनया श्रुत्या विरुध्यते सर्ववेष्टने स्पृतिस्पर्शासंभवा
तअ २ दप्रमाणमिति भाष्यं अतिरात्रे षोडशिनं नातिरात्रे षोडशिनं गृह्णातीत्येकत्रानुपसंहरणीयस्याप्यर्थस्य वेददर्शनात्सर्ववेष्टनेस्मृ
तिमूलश्रुतेरश्रुतेरत्यन्ताभावस्यास्मदादिभिरल्पसैर्निश्चेतुमशक्यत्वात् न तत्सामान्यादितरेषु तथात्वमिति न्यायेनैकस्याः स्मृ
तेरप्रामाण्ये सर्वासामपि तथात्वापत्तेश्च नासावप्रमाणं किंतु यावन्मूलदर्शनं नास्ति तावत्तदर्थानुष्ठानं न कर्तव्यमित्येतत्परं विरोधे
त्वनपेक्षं स्यादिति सूत्रमिति वार्तिकं वैसर्ज हेतुदर्शनाच्चेत्यत्र वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णातीति स्मृतेः श्रुत्यविरोधित्वेपि लोभ
मूलकत्वस्यैव हेतोर्दर्शनादप्रामाण्यमिति भाष्यं स्मृतित्वाविशेषाधस्य स्मृतेरपि मसकेनाप्रामाण्ये तेषां मत्यक्षेण वेदविरुद्धदर्शना
त्वेतस्या वेदमूलकत्वं कल्पयितुं शक्यमिति वार्तिकं शिष्टकोपविरुद्धमिति चेन्न शास्त्रपरिमाणत्वादित्यत्र वेदकर्ता वेदिं करोतीति
श्रुतिशिष्टस्य कर्मस्याकोपे सति श्रुते आचामेदित्यादिस्मृतिः प्रमाणं न तु कोपइति चेन्न शास्त्रपरिमाणत्वात् आचमनं हि [illegible] मिति कं
पदार्थः कर्मस्तु परार्थ धर्मः अतः पूर्वपदार्थः मा भूदिति पश्चादपमइति सैवलप्रमाणं नापितोऽपि स्वतोऽजघन्यत्वान्नाचमनस्मृतिवा

॥श्रीसांब॥
भा०भाषा
॥८॥

त १

धितु र्निषेध इति भाष्यं शाक्यशास्त्रेऽपि यद्वेदाविरुद्धमहिंसादिकं विहितं तत्तेऽपि ग्राह्यमिति चेन्न वेदोदितानामपि तस्यैवाहिंसादेर्मंचस्मारितक
र्मणइव फलवत्तु नान्येनेति शास्त्रे नियमात् तथा चाहुः धर्मज्ञसमयः प्रमाणं वेदाश्चेति गंगोदकमिव श्वदृतिस्थं धर्मोऽपि शाक्यग्रंथस्थ
स्तद्वाक्यान्नोपादेय इति वार्त्तिकं अत्रैतदपि वाकारणाग्रहणेन युक्तानिमित्तीयेरन् ~~तेषु दर्शनाद्विरोधस्य समा मतिः स्यादिति~~ वि
स्तृतीयसूत्रे पूर्वपक्षतोऽस्तथा वादीनां धर्मत्वे कारणं श्रुतिःस्मृतिर्वा न दृश्यते केवलं शिष्टैश्च धर्मबुद्ध्यानुष्ठीयन्ते तेषामपि शास्त्रान्तर
विरोधादर्शने सति प्रामाण्यं स्यादेव वचनमित्यपि वार्त्तिकमेव अत्र स्मृतीनां श्रुतिकल्पनापक्षे याएकान्तरितं प्रामाण्यं शिष्टाचारा
णां तु स्मृतिकल्पनापूर्वकं श्रुतिकल्पनं चेति द्व्यन्तरितं तेषु दर्शनाद्विरोधस्य समा विमतिः स्यादित्यत्र यथा दिशा द्वेधौ भूकाल एव गृह्यते र्घ
यत्रान्या ओषधयो म्लायंतेऽथैते मोदमा~~ना~~विनाइवोत्तिष्ठंतीति वाक्यशेषात् नतु म्लेच्छप्रसिद्धाभिः प्रियंग्वादय इति भाष्यं यवापोल्ला
दिपदार्थाः किं म्लेच्छप्रसिद्धा गृह्यंत उतार्यप्रसिद्धाश्चक्षाद्य इति संशये आर्याणां शास्त्रार्थयोरविप्लवे नित्यं यत्नमानानां प्रसिद्धिर्बली
यसी न तु म्लेच्छानां यथा कथंचित्सांकेतिकेरपि शब्दव्यवहारमात्रनिष्ठत्वात् यद्वाऽस्य पिद्वामुदं हेहि त्वादि स्मृतीनां निबंधनानां मातुलसुहि

ततुरपत्यंर

त्वपरिणयनाद्याचारेभ्यो निर्निबंधेभ्यो लोभमूलकेभ्यः प्राबल्यमत्र निर्णीयते वस्तुतस्तु मातुलदुहितृपरिणयनं न विगीतं तत्
तंस्य ह्यमातुलस्य वयोषा भागस्ते पैतृष्वसेयी वपामिवेति मंत्रलिंगावगतत्वात् ह्युक्तान्येः शिष्टैराहतत्वाच्च असपिंडामिति शास्त्रं
तु नातिरात्रद्वितिवन्मतांतराभिप्रायं देवान्पितॄन्समभ्यर्च्य खादन्मांसं न दोषभागिति स्मृतेरग्नीषोमीयालंभस्य कल्पेदुर्ल
भत्वात्पलपैतृकस्य च निषेधात्तु हुमयं विना क्रियमाणं मांसभक्षणं दोषहेतुरतस्तु देवाचौराहरणमिति निहाक्षिणत्याः य
दात्रिवृद्दादि पदार्थो वाक्यशेषात्सौत्रीयानवकादिकमेव न तु लौकमसिद्धा त्रिवृदंजनादिकमिति वर्णकत्रेय वार्तिके पिकादि
पदानामर्थो म्लेच्छप्रसिद्धा पिकादिपदार्थः तस्याया कश्चिदप्यप्रसिद्धे विरोधाभावात् कल्पसूत्राणां प्रत्यक्षश्रुतिसरूपत्वे
पि न वेदत्वं किंतु हेठकर्तृस्मरणात्पौरुषेयत्वमिति भाष्ये यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्निति नित्यब्रह्मयज्ञ इति
हासादीनां विनियोगान्नित्यानित्ययोः संयोगाद्योगाद्वेतान्यपि नित्यानीति स्वातंत्र्येण वेदवत्प्रामाण्यमेषां एवं मंत्रब्राह्मणयो

भा०भाषा
॥५॥

योर्वेदनामधेयं षडंगमेके इति मंत्रवत् शिक्षादीनां वेदत्वस्मरणात्तत्वातंत्र्यमिति पूर्वः पक्षः दृष्टकर्तृस्मरणादेव तेषामपि पौरु
षेयत्वात्स्मृतिवदेद मूलत्वेन प्रामाण्यं न स्वातंत्र्येण नित्यकर्मयोगस्त्वेषां मतिकल्पवर्णानुपूर्वीभेदे पि जातिशब्दवदर्थानां
नित्यत्वाज्ज्ञेयः षडंगमेके इति पूर्वपक्षोपन्यासो न तु सिद्धान्तः दृष्टकर्तृस्मरणादेवेति वार्तिकं मानवादिस्मरणानां हि लौकिका
द्याचाराणां चाध्येतृविशेषेषु देशविशेषेषु च परिगृहीतायमानोपि नास्त्येति मूलकेः तादृशीति कल्पनेन प्रामाण्यभावात्
तस्मादेषां व्यवस्थानास्ति परंपरायायथाप्रतीतं तथानुष्ठेयमित्यर्थः व्याकरणस्मृतिप्रामाण्याद्वेदवाच्याएव साधुत्वं न गावीगोणीगो
ताग्रोपोतलिकेत्यादयः तेषामशक्तिजापभ्रंशरूपत्वात् प्रयोगचोदनाभावादर्थैकत्वमविभागादित्यत्र एवं वेदे शब्दाः प्रयोक्तव्याए
वं लोके इति विशेषशास्त्राभावाल्लोकवेदयोः पदैकत्वे य एव लौकिकास्त एव वैदिकास्त एव चामीषामर्था इति स्थितं न च पदावधा
रणोपायान्बहून्निश्रुतिस्तरयः केमन्यूनातिरिक्तत्वस्वरवाक्यश्रुतिस्मृतीरितिवचनात् तत्र जराराज्योदीकेमुन्यत्वशीवपाद
र्थभेदः ब्रह्मबौहमणादौ न्यूनातिरिक्तवेशात् इंद्रशत्रुरित्यादौ आद्युदात्तत्वे इंद्रः शातयितास्य तत्पुरुषः अंतोदात्तत्वे इंद्रस्य शातयि

॥श्रीसांबायनमः

त्म

तेतिस्वरभेदात् गच्छतइत्यस्यपदस्य देवदत्तपदसंनिधौ देवदत्तस्य मैत्र चैत्र देवदत्तानितिपदान्तरसमभिव्याहारे सति तिङन्तद्विवच
नत्वे सुबन्तषष्ठ्येकवचनान्तत्वे द्वितीयाबहुवचनान्तत्वं तत्तेषां भवति यत्राहीयतु न रहीनस्याहीनत्वे अन्हः खः क्रतौ इति क्रतिस्यतीतु
अहीनपदस्यार्थभेदके न हीनोऽहीनः अन्हां समूहोऽहीन इति द्विवासः स्मेनेत्यादौ कश्चित्तदभेदेऽपि अभेद एव एकदेशन्यूनाधि
कत्वेपि तद्वेदं परमिति प्रत्यभिज्ञानादभेदज्ञापकानुशासनाच्च अतः सिद्धौ लोकवेदयोः पदानां तदर्थानां चाभेदः शाब्दार्थस्याकृ
तिरेव व्यक्तौ लक्षणयाक्षेपसंभवान्न वाच्यकोटावनुप्रवेशः एवं विधीनां स्वातंत्र्येणार्थवादमंत्रयोस्तत्सन्निधानस्य तत्पर्यत्वेन स्मृतीनां
तन्मूलत्वेन च प्रामाण्यं दर्शितं उद्भिदा यजेत पशुकाम इत्यादौ उद्भिदादिपदानां पृथिव्यवयवत्वात् तत्संकेतप्रामाण्यं तत्र गुणविधित्वे
न यागनामधेयत्वं न वेति चिन्त्यते तत्रोभयोः उद्भिदा यजेत बलभिदा यजेतेत्यादौ उद्भित्ता यागेनेष्टं भावयेदिति मत्वर्थलक्षणादोषान्नाम
धेयत्वं सोमेन यजेतेत्यादौ तु सोमशब्दस्य लतायां रूढत्वात् यागनामत्वासंभवेन गत्या सोमवतेति लक्षणाश्रयणं अत्र तु उद्भिदा
दिपदार्थस्य लोकप्रसिद्धत्वान्न तथात्वं नथा दधिमधुघृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यमिति मत्कृत्य चित्रया

॥६॥ गुणाय यजेत पशुकाम इति मासमकर्मानुवादेन चित्रत्वस्त्रीत्वलक्षणोभयविधाने वाक्यभेदात् नामधेयत्वे तु मकृत याग एव फलान्वयान्ने
कश्चिद्दोष इति चित्रापदमपि यागनामधेयं अग्निहोत्रं जुहुयादित्यत्रापि अग्निहोत्रं यस्मिन्निति व्युत्पत्त्याऽग्निरूपगुणविधाने वाक्य
भेदात् नामधेयत्वेन धात्वर्थविधानं तु सन्निहिततरं न चात्राग्निपदमनन्यगतिकं उक्तव्युत्पत्त्यैव तस्य धात्वर्थनामत्वसंभ
वात् अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति मंत्रलिंगं विधित्सित तस्य गुणस्य समर्पकमन्यच्छास्त्रमस्ति अतोऽग्निहोत्रमपि कर्म
नामधेयं श्येनेनाभिचरन् यजेतेत्यत्रापि यथा हवै श्येनो निपत्यादत्त एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्त एवं श्येनेन वद्यपदशा
श्येनपदमन्यत्र रूढमपि यागनामधेयमेव न गुणविधिपरं वाजपेयेन स्वाराज्यकामो यजेतेत्यत्रोक्तनिमित्तचतुष्टयाभा
वेपि वाजं सुराद्रव्यं पेयमस्मिन्निति न गुणविधानं विरुद्धत्रिकद्वयापत्तेर्वाक्यभेदावश्यंभावेन तत्संबंधायोगात् न हि
सकृदुच्चरितः शब्दो मत्वर्थो धात्वर्थस्य युगपत्फलेन वाजेन च संबंधं कर्तुमीष्टे तथा हि वाजेन यागं यागेन स्वाराज्यमि

॥श्रीसांब॥

त्वन्वये यागस्य फलं प्रति विधेयत्वं उपादेयत्वं गुणत्वं च. वाजं गुणं प्रत्यनुवाद्यत्वमुद्देश्यत्वं प्रधानत्वं च तच्च विधेयत्वादित्रयं ज्ञाप्यमनुष्ठे
यं शेषभूतं चानुवाद्यत्वादित्रयं ज्ञातमनुष्ठेयं शेषिभूतं चेति नैकस्मिन्नाप्यत्वज्ञातत्वादिके संभवतः मिथो विरुद्धत्वात् पूर्वं प्रयप्ययं दोषो
नुगतः तत्प्रत्युपेत्यैव विचारः प्रवर्तितो ज्ञेयः तस्मान्नामधेयं वाजपेयपदमिति सिद्धं यद्यप्येकजातीयं वाक्येषु भेदो दोषस्तथापि य
दा पूर्वं कर्म विधीयते तदा नैकगुणविशिष्टमपि तद्विधीयते विशिष्टस्यैकत्वाच्च न वाक्यभेदो दोषाभावे हेतुः यथोक्ते प्राप्ते कर्मणि ना
नेको विधातुं शक्यते गुणः अप्राप्ते तु विधीयं तद्वत्त्वोप्यकुयलत इति यथा यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो
प्र४ भवति तावब्रूतावग्नीषोमावाज्यस्य नाऽपांशु पौर्णमास्यां यजन्ते ताभ्यामेतमग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छत ऐन्द्रं दध्य
मावास्यायामैन्द्रं पयोऽमावास्यायामित्यादौ युगपद्द्रव्यदेवताकालोपाभुत्वा द्विगुणविशिष्टकर्मविधानेऽपि न दोषः बर्हिराज्यपुरोडाशकी
वादिशब्दा वैदिकप्रसिद्धा संस्कारनिमित्ता अपि यौगिका दिव्यजातिशब्दा एव नोपलक्षणं निर्मथ्यशब्दोऽपि योगरूढ एव चातुर्मास्येषु आ
म्यं ग्नेयमष्टाकपालं निर्वपेत् सौम्यं चरुं सावित्रं द्वादशकपालं सारस्वतं चरुं पौष्णं चरुं मारुतं सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृ

प्रतियोगगृह्णातीतिवत् लिंगसमवायमात्रेण प्राणभृद् प्राणभृत्समुदाये प्राणभृच्छब्दः संदिग्धेषु वाक्यशेषात् अक्ताः शर्करा उपदधातीत्य
त्राञ्जनसाधनद्रव्यसंदेहे तेजो वै घृतमिति वाक्यशेषात् घृतेनाक्ताः शर्कराः कर्तव्या इति निर्णयोपि द्रव्यस्तुतिप्रयोजनं। यत्र निर्णायकोर्थवादो
पि नास्ति तत्राख्यातानामर्थं ब्रुवता शक्तिः सहकारिणीति न्यायेन। यथा प्रासादे भुङ्क्ते कांस्ये भुङ्क्ते इत्यत्र प्रासादे उपविश्य कांस्ये परिविष्टेत्यर्थो
प्रतीयते। न तु विपरीतं। एवं स्रुवेणावद्यतीति विधिः सामर्थ्याद्द्रवद्रव्यविषये स्वधितिनावद्यतीति मांसविषये हस्तेनावद्यतीति चरुपु
रोडाशविषये व्यवतिष्ठते॥ इति विरचिते भाट्टभाषाप्रकाशे प्रथमोध्यायः भावार्थाः कर्मशब्दा इति॥ विध्यर्थवादमंत्रनामधेयस्मृ
त्याचाराख्यानि धर्मे षट् प्रमाणानि निरूपितानि इदानीं तत्स्वरूपभेदः शब्दांतराभ्याससंख्यासंज्ञागुणप्रकरणांतरैः षड्भिः प्रमाणैः प्रतिपा
द्यते। तस्य चोत्पत्तिश्चोदनावाक्यगतेभ्य सर्वेभ्यः पदेभ्यो न। गौरवात्। किंतु लाघवादितरविशेषितादेकस्मादेव पदात् तत्रापि क्रियापदादेव त
स्यैव फलसिद्धौ प्राधान्यात्। ननु पदपदात् अन्यथा सोमेन यजेतेत्यादौ श्रुतेन द्रव्यापचारे पूतीकादिप्रतिनिधिर्न स्यात् गुणोत्पत्त्यन्यायकल्पना
संभवति न प्रधाने। अतो धात्वर्थादेव धर्मोत्पत्तिः स च देवतोद्देशेन द्रव्यत्यागात्मको मानसक्रियात्मकः यद्यप्याशुतरविनाशी तथापि द
र्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति श्रुतार्थापत्त्या यागावांतरव्यापाररूपमपूर्वं नाम कालांतरभोग्यफलप्रतिभ्नतेन कल्प्यते। भोक्ता
च देहादन्यस्तत एव सिध्यति। अपूर्वाणि तु आमावास्यायोगिभ्यस्त्रिभ्यः प्रधानेभ्यस्त्रीणि प्रथममुत्पद्यंते पश्चात्समुदायापूर्वं मार
भंते। एवं पौर्णमासेप्यपूर्वत्रयादेकं समुदायापूर्वं ताभ्यां पुनः परमापूर्वं जन्यते। अंगापूर्वाणि तु तत्रैवोपकुर्वंति। तत्राप्यवघातादी

स्योनं ते सदनं करोमि घृतस्य धारया ६

नां दृष्टार्थानां नियमांशेनैवापूर्वोत्पादकत्वं प्रोक्षणादीनां तु दृष्टार्थत्वाभावात्केवलमपूर्वार्थत्वमेव एवं स्तोत्रशास्त्रयोरपि न च बाज्येः स्तुवते
प्रउगं शंसतीति श्रुत्या स्तवनस्यैव कर्तव्यता प्रतीतेर्याज्यादिवत्तयोर्देवतास्मरणादिदृष्टकार्यार्थत्वायोगात् प्रगीतमंत्रसाध्यं स्तवनं स्तोत्रं
अप्रगीतमंत्रसाध्यं तद्देवशास्त्रं एवं ब्राह्मणस्थमेवाख्यातं प्रधानकर्म वा गुणकर्म वा विधत्ते। ननु देवाश्च याभिर्यजते ददाति चेत्यादि
मंत्रस्थं भूयोगणानां मंत्राणां प्रयोगबहिर्भूते विधावसामर्थ्यात्। यथाभियुक्तानां मंत्रप्रसिद्धिस्ते मंत्राः अन्ये ब्राह्मणं। ऊहप्रवरना
मधेयानां न मंत्रत्वं प्रसिध्यभावादेव। ऋग्यजुःसामानि प्रसिद्धान्येव। पादबंधवती ऋक्। अनियताक्षरपादं यजुः गीतिः सामेति॥
प्रोक्षणीरासादयेत्यादयो निगदाः पादबंधप्रगीतमंत्रत्वाभावेन ऋक्सामाभ्यामन्यत्वाद्यजुःष्वंतर्भवंति। सुशेवं कल्पयामीति
सदनं करणार्थमेकं यजुः तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति पुरोडाशासादनार्थमपरं यजुः अन्यथा य
जुर्भेदे उभयोरपि वाक्ययोरसंगतार्थत्वादतास्यादिति निश्चीयते। इषे त्वेत्यादावाकांक्षानिवर्तकपदस्य विनास्ति तथापि इषे त्वेति
शाखामाछिनत्ति। ऊर्जे त्वेत्यनुमार्ष्टीति विनियोगबलान्मंत्रभेदः छिनद्मीत्याद्यध्याहारेण वाक्यपूरणं च। याते अग्ने यः शया तनूर्व
र्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीत्वेषं वचो अपावधीत्स्वाहेति संपूर्णार्थं मंत्राम्नाये श्रूयते। याते अग्ने रजःशयेति याते अग्ने ह
रिशयेति अनयोः साकांक्षयोराकांक्षापूरणं तनूरित्यादिना भवितुं युक्तमिति न देवानुषंजनीयं अश्रुतकल्पनापेक्षया सन्निहि

॥ श्रीसांब ॥
॥भा०भा०॥
॥१९॥

ती १ पातं यजेतेत्यादि रंगसंबंधबोधको विधिर्विनियोगविधिः अत्र व्रीहियवादीनां द्रव्यार्थानां विकल्पः समिन्नं तू नपारादीनामद्रव्यार्थानां समुच्च
यः यद्यपि विकल्पे दोषाः सन्ति तथापि वाक्यद्वयस्य समबलत्वादन्यतरेणेतरबाधायोगादगत्या गी क्रियते नेच व्रीह्युपादाने व्रीह्यंशे स्वीकृ
न ता प्रामाण्यत्यागः अस्वीकृतस्य प्रामाण्यस्य ग्रहः यवांशे स्वीकृतप्रामाण्यत्यागः अस्वीकृताप्रामाण्यग्रहः एवं यवोपादानेपि साङ्गप्रधा
नानुष्ठापको विधिः प्रयोगविधिः स च क्वचित्कल्प्यते औपदेशिकातिदेशिकैरङ्गैः सम्भवेत्तं विचारक्रमागतं कुर्यादिति दर्शपूर्णमासा व ५
भ्यां स्वर्गकामो यजेत ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिस्तु स्वर्गकामपदसत्वेप्यद इति प्राप्तस्याप्युत्पत्त्यनुवादरूपत्वेन पक्षमाश्रित्य यतोतः स
ते ५ पुनस्त्रिविधः अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति नत्र यात्यन्ताप्राप्तस्यार्थस्य विधायकः स आद्यः यथा व्रीहीन्प्रोक्षतीति
न ह्येनं विना प्रोक्षणं व्रीहिषु मानान्तरेण कथंचिदपि प्राप्नोति लोकतो वेदतो वा यत्पक्षे प्राप्तस्याप्राप्तांशपरिपूरणफलो द्वितीयः
यथा व्रीहीनवहन्तीति यथावाग्रयणे व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेताय वे भ्यः यवैरिष्ट्वा यवैरेवा यजेता व्रीहिभ्य इति आद्ये तंदुलनिष्प
त्याक्षेपादवघातवन्नखविदलनस्यापि लोकावगतकारणत्वाविशेषात्प्राप्तौ अवघाताप्राप्तांशोस्ति द्वितीये सर्वाहत व्रीहियववाक्या भि ३
भ्यां व्रीह्याग्रयणाद्यर्थमपि पक्षे यवप्राप्त्या व्रीह्यप्राप्तांशोस्ति तत्परिपूरणेनेतरनिवृत्तिरर्थाद्भवतीति व्रीहिरिवेत्येवकारोनुवादः वेदतो
रि २ लोकतो वा समुच्चित्य प्राप्तेतरनिवृत्तिफलको विधिस्तृतीयः यथा इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इति पञ्चपञ्चनरशा
मक्ष्यायतिच अग्निचयने द्वयोः चयनार्थं अश्वरशनाग्रहणं गर्दभरशनाग्रहणं चेति द्वयमनुष्ठेयं तत्रोभयत्र मन्त्रो रशनाग्रहणप्र

॥श्री॥
॥१९॥

॥श्री महादेव॥

काज्ञानसामर्थ्यरूपाल्लिंगादेव प्राप्तइति नाप्यश्वरशनांगत्वं संत्रस्य प्रतीयतेऽपितु गर्दभरशनातोव्यावृत्तिरगत्या दोषत्रयं सोढ्वा पुंगी क्रिय
तेविधिवैयर्थ्यपरिहाराय दोषत्रयं नश्रुतस्याश्वरशनायाः ग्रहणागतस्य त्यागः अश्रुतस्य गर्दभरशनांगत्वस्वीकारः जनस्य ग्रहणं मंत्रलिंगात्सामा
न्यतः प्राप्तस्य गर्दभरशनांगत्वस्य पौगइति श्रुतहानिरश्रुतकल्पनाबाधश्चेति सर्वत्र परिसंख्यायां दोषत्रयं ज्ञेयं एवंभूते विधित्रिविधे इतरक
मेद्विविधं गुणकर्मार्थकर्मभेदात् तत्र यत्क्रतुकारकमाश्रित्य विधीयते तदाद्यं उत्पत्त्याप्तिविकृतिसंस्कृतिरूपफलभेदाच्चतुर्विधं वसंतेऽग्नीनादधी
त यूपंतक्षति अग्न्याधानतक्षणादि संस्काराभ्यामग्नियूपयोः प्रागसतोरुत्पत्तिः फलं एवं पिष्टानि संयौतीत्यत्र संयवनस्य पिंडोत्पत्तिः स्वाध्या
योध्येतव्यः गां दोग्धीत्यादावध्ययनदोहनाभ्यां सिद्धयोरेव स्वाध्यायपयसोः प्राप्तिः सोममभिषुणोति व्रीहीनवहंति दक्षिणेनाज्यं वि
लापयतीत्यादौ कंडनादेसोमादि पूर्वरूपपरित्यागेन रूपांतरापत्तिर्विकृतिः चतुरो मुष्टीन्निर्वपति व्रीहीन्प्रोक्षतीत्यादौ निर्वापप्रोक्षणाभ्यामपू
र्वीयेषु व्रीहिषु अदृष्टरूपगुणाधानं दोषापकर्षणं वा संस्कार आरभ्य क्रियते तस्य फलं तेषु योग्यत्वसिद्धिः दृष्टरूपोपि संस्कारः पुरोडाशा
न्नलंकरोति तंडुलान्प्रक्षालयतीत्यादिः क्रतुकारकमनाश्रित्य यद्विधीयते तदर्थकर्म तच्च द्विविधं अन्यार्थमंगमनन्यार्थं प्रधानंच
अंगमपि द्विविधं सन्निपत्योपकारकं आराद्युपकारकंच तत्र यत्प्रधाने क्रतुरूपे स्वरूपेणोपकारकं तदाद्यं यथा व्रीह्यादि यत्क्रत्वपूर्वमुप
करोति तद्द्वितीयं यथा प्रयाजादि अनन्यार्थमपि द्विविधं प्रकृतिरूपं विकृतिरूपंच तयोर्यत्र त्रिधा सर्वाण्यंगानि विधीयंते तत्प्रथमं
दर्शपूर्णमासज्योतिष्टोमादि यदंगविकलं विधीयते सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः विश्वजिता यजेतेत्यादि तच्च प्रथमे कथंभाव

इष्टिविकृतिः१ यागविकृतिः१

॥भा०भा०
॥१०॥

वषट्कारसहितो होमो यागस्तद्भिन्नो दर्वीहोमः ॥२ यतो विकृतिरतिदेशवाक्यात्सर्वमंगजातं गृह्णाति सा प्रकृतिरन्या विकृतिः ॥२

पुरस्तात्तस्य सन्निधौ पठितैरेवांगैर्भवति द्वितीये तु प्रकृतिवद्विकृतिः कर्तव्येति कल्पितेनातिदेशवाक्येनेति विशेषः अग्निहोत्रादीनि तु
दर्वीहोमास्याप्निप्रधानकर्माणि न तानि कस्यचित्प्रकृतिर्विकृतिर्वा भवन्ति किंतु पूर्वाण्येव तान्यपि कर्माणि त्रिविधानि नित्यनैमित्तिकका
म्यभेदात् यावज्जीवादिचोदनाचोदितं नित्यं यावज्जीवमग्निहोत्रं जुहुयात् यावज्जीवं दर्शपूर्णमासाभ्यां यजेत वसंते वसंते ज्योतिषा यजेत ज्यो
तिषा ज्योतिष्टोमेन अहरहः संध्यामुपासीत तानेतान्यज्ञानहरहः कुर्वीतेत्यादि निमित्तानंतरं कर्तव्यं नैमित्तिकं वैश्वानरं द्वादशकपाले
निर्वपेत् पुत्रे जाते इत्यादि प्रायश्चित्तमप्येतेनैवात्र भवति तच्च द्विविधं क्रत्वंगेषु निमित्तं पुरुषांगेषु निमित्तं च आद्यं अग्नये पथिकृते पुरोडा
शमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासौ सन्नमावास्यां पौर्णमासीं वातिपातयेदित्यादि यो ब्रह्मचारी अवकिरेत्स नैर्ऋतं गर्दभमालभेतेत्यादि
द्वितीयं भिन्नत्वं प्रसक्तं तु प्रसक्तौ त्वया प्रकृतमनुसरामः यथा य एवमिति विद्वद्वाक्ये पौर्णमासीपदेनाग्नेयादित्रिकस्यानुवादः एवमुपांशु
याजमन्तरा यजतीत्युपांशुयाजपदेन विष्णुरुपांशु यष्टव्योऽजामितायै इत्यादिवाक्यविहितविष्ण्वादित्रिकस्यानुवादो ह्युक्तिस्तेन युक्तं जामि वा एतत्
यज्ञस्य क्रियते यदन्वंचौ पुरोडाशावित्युपक्रांतजामितादोषपरिहाररूपकेनापि भवति जामि वा एतदजामितायै इति च श्रूयमाणोपक्रमोपसं
हारैकरूप्यावगतस्यैकवाक्यत्वस्य योगत्रयकल्पनया भंक्तुमशक्यत्वात् ननु द्रव्यदेवतं यागस्य स्वरूपमेतत्तावाक्येनास्ति यद्वच्चवाक्ये
तु देवतामात्रमप्यस्तीति अत्रैव यागोत्पत्तिरिष्टेति चेन्न सर्वस्मै वा एते यज्ञाय गृह्यन्ते यद्ध्रुवाया आज्यमिति ध्रौवाज्यलाभस्योभयत्रापि
तुल्यत्वात् आग्नेयाग्नीषोमीययाज्यानुवाक्यायुगलयोरंतराले पठिता याज्यानुवाक्यायुगलोच्च देवतालाभ इति न किंचिद्दुष्टं यद्वच्च

यावज्जीवादिपदं नित्यत्वबोधकं ॥३

५ सम्भव्यानि मित्ततमथः याजी

वाक्यं तु स्तुतिमात्रं ईदृशीय सुपर्णाय याज्योऽयत्र विकृष्यते इति । तत्र विसृनाम्नी षोमो प्रजापतिश्च विकल्प्यंते एवमन्यत्रापि कर्मभेदा
र्थः पूर्वपक्षः तदभेदार्थः सिद्धांत इति शेयं । तिस्र आहुतीर्जुहोतीत्यत्र कर्मगतत्वात्संख्यायाः स्वरूपकर्मभेद इति सप्तदश प्राजापत्यान्प
शूनालभत इत्येवोदाहरणं प्रजापतिदैवतायेपामिति विग्रहे सप्तदश पशुद्रव्यतीको यागः प्राजापत्यश्च प्राजापत्यश्च प्राजापत्यश्चेति । श्रुत
त्वद्वितांतानामेकशेष इति पशु प्राजापत्यत्व पर्यवसानात्सप्तदशैव यागाः प्रकृतौ त्वेकपशुनिष्पन्नैकादशावदानद्रव्यत्वं यागस्य दृष्टं
तत्सामान्यादतिदेशादिहापि प्राप्तं न प्रत्याख्यातुं शक्यं अतः सप्तदशैव यागाः फलं तु पूर्वपक्षे एकपशुनाशे गणनाशः सिद्धांते तन्मा
त्रस्यैव नाश इति तस्यैव पुनरुत्पादनं न गणस्येति । प्रदानं तु देशकालकर्तृक्यात् सर्वेषां सहैव दधिपयसोरपि प्रकृतावेवमेव ज्योतिष्टो
मं प्रकृत्य अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेत्यादौ न पूर्वेणैव सहस्रदक्षिणगुणविधिः ज्योतिरादि
पदानामानर्थक्यापातात् संज्ञाश्रुत्यार्थांतरावगमेन प्रकरणविच्छेदावश्यंभावाच्च ज्योतिरादिसंज्ञानि कर्मांतराणि एवैतानि सा वैश्वदेव्या
मिक्षा वाजिभ्यो वाजिनमिति वैश्वदेवयागे उत्पत्तौ आमिक्षयावरुद्धे उत्पन्नशिष्टं वाजिनं निवेशमलभमानं ततोन्यद्वाजिदेवत्यं वाजिनद्र
व्यकं कर्म उपस्थापयतीति गुणात्कर्मभेदः यत्र तूत्पत्तौ निर्गुणं कर्म श्रूयते पश्चादनेके गुणाश्च श्रूयते तत्र सर्वेषां गुणानां विकल्पेन निवेशो
न तु कर्मभेदकत्वं यथाग्निहोत्रं जुहोतीत्यत्र दध्ना जुहोति पयसा जुहोतीत्यादीनां अग्निहोत्रं प्रकृत्य श्रूयते दध्नेंद्रियकामस्य जुहुयादिति ॥

॥आ०भा०
॥११॥

तत्र धात्वर्थस्य प्राप्तत्वाद्गुणमात्रं विधेयं यत्तु विधेयं तस्यैव फलं अतोत्र पूर्वस्मिन्नेव कर्मणि फलाय गुणो विधीयते न तु गुणः कर्मभिन्नमीति
अग्निष्टुति वारवंतीयमग्निष्टोमसाम कार्यमित्युक्त्वाम्नायते एतस्यैव रेवतीषु वारवंतीयमग्निष्टोमसाम कृत्वाह्येतेन पशुकामो यजेतेति अ
त्र पूर्वस्मिन्नेव कर्मणि रेवत्याधारवारवंतीयलक्षणो गुणः पशुफलाय विधातुं न शक्यते दधिवदस्य प्रसिद्धत्वाभावात्तस्य ज्ञातकर्मानु
वादेन गुणस्वरूपं तत्फलं चेत्युभयं विधातुमशक्यं वाक्यभेदात् तस्माद्धृत्वाशब्दकल्पितरेवतीवारवंतीयसंबंधविशिष्टो पूर्वो यागः फ
लाय विधीयते एतस्येति षष्ठ्यंतमपि प्रस्तूयमानगामि न तु पूर्वं प्रकृतगामीत्यपि सिद्धं २ यदि रथंतरसामा सोमः स्यादैंद्रवायवाग्रान्
गृह्णीयात् यदि बृहत्सामा शुक्राग्रानिति प्रकृते ज्योतिष्टोमे ग्रहाग्रतामात्रं विधीयते न तु ततोन्यत्कर्म रथंतरसामादिकं विधिशास्त्रुपघाते.
कयदिशाद्वात्रकरणाच्छेदात् राजा राजसूयेन स्वाराज्यकामो यजेतेत्यत्र राजशब्दस्य क्षत्रियवाचित्वात् तन्मात्राधिकारिकायामपि राजसूया
नगतायामवेष्टि संज्ञायामिष्टौ यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा नमभिघारयेदित्यादीनि वचनानि एतया
न्नाद्यकामं याजयेदित्यन्नाद्यकामब्राह्मणादीनामप्यवेष्टिं ज्ञापयति एवं च सति ब्राह्मणोग्निमादधीत ग्रीष्मे राजन्यः शरदि वैश्यः वसंते
ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमित्येतान्यपि वचनानि यथावर्णमाधानोपनयनयोः प्रापकाणि। कुंडपायिनामयना
रथ्येस सत्रे उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति मासं दर्शपूर्णमासाभ्यां यजेत इत्यत्रापि नैयमिकाग्निहोत्रादेः सत्रे उपस्थित्यस

मवाप्य द्वमाद्रेणोपस्थित्यभ्युपगमेपि प्रामकर्मानुवादेनउपसंदानं न दर्शमासउगुणाश्च विधातुमशक्यं वाक्यभेदात् न च प्रानेक कर्मणि
मासः संपादयितुं शक्यते अनुपादेयत्वात्तस्य तस्मादनुपादेयगुणसंबंधानुगृहीतोऽसन्निधिः कर्म भिनत्ति अनुपादेयगुणास्तु देशः
कालो निमित्तं फलं संस्कार्यश्च न च सरस्वत्यादक्षिणेन तीरे आग्नेयोष्टाकपालः सत्रायामयं विश्वजिता यजेत आग्नेयमष्टाकपालं निर्वपेद्
रुक्कामः वैधातव्यादीक्षणीया इत्यश्वमेधे इति कर्मणः कर्मभेदोदाहरणानि द्रष्टव्यानि अवदारी पौर्णमासिका आग्नेया सौम्य देशिकावाग्ने
योभिन्नो काम्याभ्यां वैधातवी विश्वजिदा संस्कारकेन निमित्तकेनोभिन्नो सर्वत्रानुपादेयगुणगणविशेषितासन्निधिरूपप्रकरणान्तरस्य कर्म
भेदहेतोस्तुल्यत्वात् सन्निधौ त्वनुपादेयगुणसंबंधेपि न कर्मभेदः यथा समेदर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां पौर्णमास्यां यजेत या
वज्जीवं दर्शपूर्णमासाभ्यां यजेत एतया अन्नाद्यकामं याजयेत शेषात्त्विष्टकृते समवद्यतीति दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति विहि
तात्काम्यः प्रयोगान्तरयो यावज्जीवं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति पुरुषार्थः प्रयोगः अग्निहोत्रं जुहोतीत्यादयो विषयः शाखाभे
दान्नभिद्यते शाखाभेदात्तु नः श्रुतित्वानापत्तेः एकसन्निधौ हि पुनः श्रुतिर्भेदिका समिधो यजतीत्यादौ नासन्निधापित्युक्तं प्राक् ॥ ॥
इति भाट्टभाषाप्रकाशे द्वितीयोध्यायः ॥ ॥ एवं सिद्धे कर्मभेदे भिन्नानां तेषां शेषशेषिभावो निरूप्यते शेषत्वं चान्याविनाभूतत्वं
आग्नेयादीनां त्रयाणामन्योन्यशेषत्वापत्तेः नाप्युपकारकत्वं अंगमनुत्पादयतः प्रधानस्यापि शेषतापत्तेः अतोयः परार्थः स

नियतसहचरितत्वं २

२ पुरुषस्य च
कर्म प्रति २

शेषः पारार्थ्यं च द्रव्यगुणकर्मणां यथा वक्ष्यमाणानां व्रीह्याज्यदेशकालानां यागं प्रत्यस्ति एवं यागस्य फलं प्रति फलस्य च पुरुषं प्रति
तेन पूर्वः पूर्व उत्तरउत्तरं प्रतिशेषः उत्तरउत्तरस्तु पूर्वं पूर्वं प्रतिशेषीति भेदः नचापि चतुरो मुष्टीन्निर्वपति व्रीहीन्प्रोक्षति व्रीहीनवहन्ति
आज्यमुत्पुनाति शरवा छिन्नत्तीत्यादयः औषधात्यसान्नाय्यधर्माः गोग्यतया व्रीह्यादियोगाच्चौषधारिष्वेव यथायोग्यं व्यवतिष्ठन्ते अन्तव्रीह्या
रिपदम पूर्वीयद्रव्यलक्षणं अन्यथायवादिभ्यः प्रोक्षणादिव्यावृत्त्या पत्यापरिसंख्यातोपन्नेः यथेयं संस्कारव्यवस्था एवं सप्ये नोहन्ति
कपाले पुत्रेपयति अग्निहोत्रहवण्या निर्वपति उलूखलमुसलाभ्यामवहन्ति शूर्पेण विविनक्ति दृषदुपलाभ्यां पिनष्टीत्यादावपि
यथा हितं द्रव्यव्यवस्था गुणव्यवस्थाप्येवं अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणातीत्यादौ आरुण्यस्य क्रयान्वयेपि अन्य
तेते नस्वतः कारकीभवितुमशक्नुवानस्य सन्निहितैकहायिनीद्वारेव कारकत्वेन व्यवहितेन वाससा क्रीणातीत्यादौ वासस्यावगतवास
आरि द्वारेति एवं कात्संस्कारद्रव्यगुणावैव स्यामपि यहं संमार्ष्टीत्यादौ यहाद्युद्देश्य संमार्गविधौ उद्देश्यविशेषणीभूतमेकत्वं नवि
वक्षितं तस्मात्सर्वेषु यहेषु संमार्गः प्राप्नोतीति यहं संमार्ष्टितं नैकमित्यन्वयवाक्यभेदात् यहस्वरूपं तु विवक्षितमेव उक्तदोषाभावात्
तेन यहपदं न सामपाणमात्रोपलक्षणमपि किं तु चमसेष्वपि संमार्गप्राप्तिः सप्तदशारत्निर्वाजपेयस्य यूप इत्यत्र वाजपेयोद्देशेन सप्त
दशारत्नित्वविधौ उद्देश्यस्वरूपमपि विवक्षितं न तद्रूपे यूपस्याभावे नानुपयोगात् नहि वाजपेयस्य यूपोस्ति किं तु यूपेन अर्थके
सतवाजपेयाग भूते यूपे उद्द्यूपोस्तीति नच सात रस्य निविशते समिधो यजतीत्यारभ्य प्रयाजानिष्ठा हवींष्यभिघारयतीत्यत प्रयाजा

॥श्री॥
पन्ना ३ भा॰
॥१३॥

वांतरप्रकरणं तन्मध्यपठितम् अभिक्रामं जुहोतीत्यभिक्रमणं प्रयाजांगमेव संदंशमध्यपतितं सन्त्रमहाप्रकरणिनमनुगच्छतीति सामि
धेनीरन्वाहेत्यारभ्य अंतरान्त्यमदेवत्यायेत्यंतं सामिधेन्यवांतरप्रकरणं वद्रसमानं मध्यपतितं मध्ये पठिते ये ह्येमन्निद्धा इत्यादिमिनि
विनंनैः प्रकरणाविच्छेदात् तन्मध्यपतितम् अपि यदुपव्ययते देववर्त्मैव तत्कुरुत इत्युपवीतं दर्शाद्यंगं वारणो यज्ञावचरो वैकंकतो यज्ञावच
र इति नन्वारभ्याधीतवारणत्वकृतिहारायत्ते प्रदोदितात् विलयत्नोगतं पात्राणां आज्यभागगतयोर्वार्त्रघ्नलिंगकमंत्रयोः धन्व क्रमक
मंत्रयोः आवर्त्ते पौर्णमास्यामनूच्येते वृधन्वती अमावास्यायामिति वाक्याद्विनियोगः हस्तावनेजनादि सर्वे कर्मांगं प्रकरणात् पुरोडाशं
चतुर्धा करोतीति सामान्यवचनं आग्नेयं चतुर्धा करोतीति विशेषवचनेनोपसंह्रियते १ यद्यपि मंत्राणामस्त्ययेव वक्तव्या विधेयार्थप्रका
शकत्वं सर्वत्र सिद्धं तथापि ऐन्द्र्या गार्हपत्यमुपतिष्ठते त्याशीन्तीयाश्रुत्या ऐंद्रस्य मंत्रस्य लक्षणया गार्हपत्यप्रकाशकत्वमुपेयते श्रु
त्यपेक्षया इंद्रप्रकाशनसामर्थ्यरूपस्य लिंगस्य दुर्बलत्वात् सूक्तवाकेन प्रस्तरं प्रहरतीति तृतीयाश्रुत्या इदं द्यावापृथिवी भद्रमभू
त्यादि ४
दित्यादिमंत्रगणोऽस्य सूक्तवाकसंज्ञस्य प्रस्तरप्रहरणांगता गम्यते तेनाग्निरिदं हविरजुषतेत्यादिमंत्रवर्णाद्देवता लभ्यते प्रस्तरो द्रव्यं
प्रहरति यागवचनेन इति लभ्यते न चैवं देवताप्रकाशनेन न कृतार्थस्य तस्य पुनर्विनियोगो न युज्यत इति तदुपलक्षिते कार्ये स्रुग्धार
णमेव कृतार्थस्य प्रस्तरस्य प्रतिपत्तिरत्र विधीयत इति वाच्यं किमिव वचनेन न कुर्यात् नास्ति वचनस्यातिभार इति न्यायेन कारकेभ्युते
रुपलक्षणापेक्षया बलवत्त्वेन च तत्संबद्धं प्रहरति र्यदेवतासंस्कारार्थं होमं विधत्त इति कल्पनात् सूक्तवाकेनेति तृतीयया कृत्स्न

॥श्रीत्रिपुरा॥
॥१३॥

स्यतस्य प्रहरणं गतेपि लिंगवशात्पर्वद्वये विभज्य विनियोगः कल्प्यः अन्यथा दर्शेयी पोमाविदं हविरिति मंत्रोत्यंतानर्थकः स्यात् आन
र्थस्य प्रतिहतानां विपरीतं बलाबलमिति न्यायेनात्र लिंगबलान्नतो याकृतिः सूक्तवाके कंदेशान्नेभयति काम्यकांडे ऐंद्राग्यादीन्योगाभि
धायतल्लिंगकानि याज्यापुरोनुवाक्यायुगलाम्नायाम्नातानि इंद्राग्नी रोचनादिव इत्यादीनि तानि लिंगमात्रात्र सर्वत्र विप्लुवंते किंतुक्रम
ब्रा ४ समाख्यांत्स्थानलवनिविशते क्रमः स्थानं सन्निधिरित्यनर्थांतरं भक्षेहि माविशेत्यादेर्भक्षणमंत्रस्य भक्षानुवाकसमाख्यामात्रेण न
निगीरण ५ कृत्वानुवाकस्य भक्षणार्थत्वं किंतु यहणावेक्षणैसम्यग्जरणादेरपि प्रकाशनाद्यथा लिंगं यहणादे मंत्राव्यवतिष्ठते भक्षसमेइंद्र
पीतस्येति पदमनेन इंद्रेणसोमानां भक्षणेदुहं निवृत्तिं वा न भजते तहेतोरिडेण पीतस्येत्यस्यार्थस्याविवक्षितत्वात् किंतु इंद्रपी
तःसोमोयस्मिन्सवने तेनेंद्रपीतनस्य सवनेधेनुसोमं भक्षयामीत्यर्थो विवक्षितः इहलोपहेतोस्तत्तीयात तत्पुरुषात् अन्यपदार्थप्रधा
नस्यापि बहुव्रीहिसमासस्याश्रितत्वात् सर्वेच सोमा एवंविधसवनसंबंधिन इति सर्वेषां यथाम्नातमंत्रेण भक्षणं २ श्रुतिलिंगयो
र्विनियोगमुक्त्वा वाक्यस्य प्रकरणस्थानसमाख्याभिर्विनियोगश्चिंत्यते तत्र योवेदा अजायंते त्यग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सा
मवेद इति वेदपदेनोपक्रम्य उच्चैर्ऋचा क्रियते उपांशु यजुषा उच्चैः साम्नेत्युच्चैस्त्वादिकं विधीयते तत्र मंत्रब्राह्मणसमुदायो वेदः पा
दबंधवती गायत्र्यादिरेव ऋक् असंजातविरोधिनाउपक्रमगतवेदपदेन संजातविरोधिविधुदेशगतमपि ऋगादिपदं स्वविषयव्यव

॥मी०भा०
॥१४॥

स्यापते नतु विधिप्राधान्याद्वैपरीत्यं वक्तुं शक्यं यत्र विरोधस्तत्रैव लक्षणाया औचित्यात् गुणत्वन्यायकल्पनेत्यस्यानुपसंजातविरोधि
न्यर्थवादेष्वप्रवृत्तेः तस्माद्धस्पदेन केग्वदणव शाखा नतु सबार्त्रं तेन क्रमेदान्तगतानां यजुषामप्युच्चैस्त्वं यजुर्वेदगतानामृचाम
उपांशुत्वं फलं ऽनूद्योपक्रमोपसंहारैकवाक्यतया वेदधर्मोयमवधारितः इति वाक्यवशेनायं विनियोगः दर्शपूर्णमासाभ्यां स्वर्गका
मो यजेतेत्यतो दर्शपूर्णमासाभ्यां स्वर्गं भावयेदित्यवगते केन प्रकारेण भावयेदित्याकांक्षायामाह समिधो यजति व्रीहीनवहन्तीत्यादि
तेनायमर्थः समिदादिभिराराद् उपकारिभिरवघातादिभिः सन्निपत्योपकारिभिश्चांगैः सपन्नोतौ यथा फलं साधयितुं क्षमौ भवतस्त
था यजेतेति गम्यते ननु तथोपकारार्थिनि यागे उपकर्तुं समर्थानां प्रयोजनाकांक्षाणामंगानां चान्योन्याकांक्षालक्षणेन प्रकरणे
न शेषभावः दर्शपूर्णमासादौ येन क्रमेण कर्मणामाम्नानं तेनैव मन्त्राणां चास्तीति उपांशुयाजस्थाने पठितो दब्धिर्नामासीति मन्त्रः
श्रुत्याद्यभावेऽपि स्थानप्रमाणादेवोपांशुयागांगत्वं भजते दर्शपूर्णमासादिष्वाध्वर्यवहौत्रौद्गात्रादिसमाख्यया ख्याताः पदार्थाः क
र्त्रपेक्षाः सन्ति कर्तारश्चाध्वर्य्वादयः कार्यार्थापेक्षाः सन्ति तेषां येन केनचिदृत्विक् किंचित्कर्म कर्तव्यमित्यनियमे प्राप्ते समाख्यया प्रमाणे
न क्रियाकृते संबंधः तिष्ठति अथैषां बलाबलं चिन्त्यते तत्र सूत्रं श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्ब
ल्यमर्थविप्रकर्षादिति एतेषु श्रुत्यादिषु परं परं दुर्बलं कुतः अर्थविप्रकर्षात् श्रुतिर्हि निरपेक्षा शब्दरूपा स्वयमेव विनियोजी
भवति लिंगं तु श्रुतिं कल्पयित्वा विनियोजकं न स्वातन्त्र्येण एवं वाक्यं लिंगश्रुती प्रकल्प्य विनियोजकं एवं प्रकरणं त्रयस्य कल्पनया

॥श्री॥

श्रुति

स्थानं चतुर्थस्य समाख्या पञ्चकस्येति विप्रकर्षो ज्ञेयः तत्र लिंगयोर्विरोधे श्रुतिर्बलीयस्त्वमुक्तं ऐन्द्र्या गार्हपत्यमित्यत्र
लिंगवाक्ययोर्विरोधेऽपि स्योनं त इत्यत्र वाक्यात्कृत्स्नस्य कमनत्वे प्राप्ते लिंगात्सदनकरणस्थापनरूपद्वयप्रकाशकान्मन्त्रभेद इत्युक्ते
वाक्यप्रकरणयोर्विरोधोदाहरणं सूक्तवाके स च लिंगवशात्पर्वद्वये विभज्य विनियोज्य इत्युक्तं तत्रेदं हविरजुषतामित्यादी
निपदानि प्रकरणाविशेषप्यन्यत्र न प्रयुज्यन्ते अपितु वाक्यस्य बलवत्त्वादग्नीषोमावित्येतेन नैव सम्बध्यन्ते तत्रैकवाक्यताद
ग्नीषोमलिंगप्रकाशनसामर्थ्यं ततः श्रुतिस्ततो विनियोग इति विप्रकर्षः इन्द्राग्नीपदे तु प्रकरणद्वारा एकवाक्यतमिति विप्र
कर्षः तस्माद्वाक्यं प्रकरणाद्बलवत् स्थानप्रकरणयोर्विरोधे तु इष्टिपशुयागात्मके राजसूये प्यभिषेचनीयाख्यः सोमया
गास्तत्सन्निधौ पठिता विदेवनादयः यावता प्राकृतकथंभावे निराकांक्षेऽभिषेचनीये यथाकथंचित्सन्निधानादाकांक्षा प्रकल्प्याग
त्वं कल्प्यते ततः प्रागेव प्रकरणाद्राजसूययागत्वमेवागम्यते अतः सन्निधेः प्रकरणं बलवत् क्रमसमाख्ययोस्तु पौरोडाशिकस
माख्ये काण्डे सान्नाय्यपात्रशुन्धनक्रमे शुन्धध्वमिति मन्त्रो यावता समाख्यया संबन्धं प्रकल्प्य पुरोडाशांगतां नीयते तावत्सन्निधिः कृत
संबन्धहाराकांक्षाक्रमेणैकवाक्यत्वं ततः सामर्थ्यं ततः श्रुतिं प्रकल्प्य तस्य सान्नाय्यांगत्वं विधत्त इति समाख्यातः सन्निधिर्बलवान्
न अत्र श्रुत्यादिभिर्लिंगादीनां बाधः कल्पनालाघवो ऐष्टिकादिकल्प्य पदार्थस्य प्राप्तत्वादेव प्राकृताः कुशास्त्वयस्तु प्राप्ता एव स
तो वैकृतैस्तैर्बाध्यते एवमाहवनीये जुहोतीति सामान्यशास्त्रेण प्राप्त आहवनीयः पदे जुहोतीति विशेषेण बाध्यत इति

॥मा०भा०
॥१५॥

तातीयीकाद् ग्रामका धात्रामिकः ग्रामका धो विलक्षण इति तेयं ज्योतिष्टोमे तिस्र रात्र सान्द्रस्योपसदो द्वादशाहीनस्येत्यत्राही
नपदं न हीने इतियोगाज्ज्योतिष्टोमं वर्तते तत्रैव द्वादशोपसत्त्वमपि विधीयत इति न अन्ये समूहो हीन इति हि रात्रा राव हीन
सा स्य स्तृठत्वार कतामित्य रात्रास्त समूहे ऽर्थे ख प्रत्ययस्तस्यायनेयीति सनेत्वेनादेशे आद्युदात्तश्चेति प्रत्ययस्वरेण
ईकारस्योदात्तत्वमध्योदात्त पदं चात्र प्राप्ते समासे त्वव्ययपूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तत्वं स्यान्नैव तथा पठंति तस्मादह
र्गणात्व द्वादशोपसत्त्वं उपसत्त्व स्तुत्यर्थं अनुकीर्त्यमानमित्युत्कृष्यते तत्र युवं हि स्थः स्वःपती इति द्वयोर्यजमानयोः प्रतिप
दं कुर्याद्दिशत्वं तु द्वित्वं न स्त्रीपुंसनिमित्तं अग्नीषोमयोरेव तावत्पन्न योर्यजमानत्वस्याशक्यत्वात् सोमेन यजेतेति वसंते वसंते ज्योति
षा यजेतेत्युत्पत्ति प्रयोगनोदनयोराख्यातोपात्तगुणभूतोपादेयकर्तृगतमेकत्वं विवक्षितं नातो द्वियजमानत्वं प्राया हीनादिषुत्कृ
ष्यते ॥ एवं दर्शपूर्णमासयोः पश्वभावे पिंजाघन्यापत्नीः संयाजयंतीत्येतन्नोत्कृष्यते तृतीया श्रुत्या यागांगत्वेन विधीयमानत्वात्
क्रियापिंजाघन्यापत्नीसंयाजानां द्व्याकांक्षानिवृत्त्युपपत्तेः दर्शपूर्णमासयोः प्राप्त पिष्टभाग इति चेत् तत्र प्रकरणे प्राप्त्या
वाघत्र चातुर्मास्याशेषो पो स्वरु स्तत्रोत्कृष्यते पुरोडाशोपात्ततात्पशौ च हृदयादिस्वरूपनाशापत्तेः पेषणस्याविधेयत्वात्त्वि
ष्चरावपि पाकवैराधेन चरुशब्द प्रयोगोपपत्तेश्चरावेव पौष्णः पेषणं देवतांतरविशिष्टस्तु प्राप्तिन पेषणं विशिष्टस्याति

कृत्वा तत्र नैवलस्याप्रवृत्तेः ॥ दर्शपूर्णमासयोः निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामुपव्ययत इति श्रु
तं तत्र सदोपवीतिना भाव्यमिति श्रुतेः नित्यमुपवीतस्य प्राप्तिरस्तीति निवीतमित्यर्थवादः उपवीतं च स्मृत्या पुरुषार्थत्वेन प्रा
प्तमपि क्रत्वर्थं पुनर्विधीयते संभवति हि पुरुषार्थस्यापनेपि क्रत्ववैगुण्यमन्यमानस्य तदप्राप्तिरिति एवं तत्रैव नानृतं वदेदि
त्यस्यापि पुनर्विधिर्नैयः मृताग्निहोत्रे अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीति विज्ञायत इत्यत्र परप्रक
रणे प्राप्तत्वादुपरिधारणमपि विधीयते दर्शपूर्णमासयोः नस्मात्क्रज्यमानो नृपान्नमदक्षकृत इति । मन्त्रः वाक्यप्रकर
णयोरविरोधात्क्रतावपि ज्ञाभायाः संभवान्न प्रकृतं क्रतुमुल्लंघ्य वाक्येन पुरुषार्थेपि स्यादिति नन्वेवं तस्माद्ब्राह्मणायनावगुरे
नैत्यवगोरणनिषेधस्य पोऽग्राम्भाला यावगुरेत शतेन यातयादिति पातनाख्यपृथक्फलश्रवणात् क्रतुमुल्लंघ्यापि पुरुषार्थत्व
वतिष्ठते एवं मलवद्वाससा न संवदेतेत्यपि पुरुषार्थतामपरुध्य यजेतेति-वचनेन क्रतुमध्येऽवरुद्धया तया सह संवादप्रशक्तेः
तस्मात्सुवर्णं हिरण्यं भार्यं इवं दुर्वर्णोस्य भ्रातृव्यो भवतीति च पुरुषार्था सुवर्णधृतिः पूर्वोक्तो भेदानेवारुणि छिवैदिके एवाभेदानन्तु
लौकिके दर्शपूर्णमासयोराग्नेयोष्टाकपालो भवति तथाउपस्तृणाति अभिघारयति द्विर्हविषोवद्यति चतुरवत्ययजुहोतीत्य
न कृत्स्नस्य पुरोडाशस्य यागीयद्रव्यत्वेपि अक्षेपो ह्यवदानमात्रस्य वक्तव्य इति भाष्ये अवदानमेव यागीयं द्रव्यमिति वार्तिके॥